.. shrIve.nkaTeshAShTottarashatanAmastotram 4 ..

# ॥ श्रीवेंकटेशाष्टोत्तरशतनामस्तोत्रम् ४ ॥

ऋषय ऊचुः ।
सूत सर्वार्थतत्त्वज्ञ सर्ववेदाङ्गपारग ।
येनचाराधितः सद्यः श्रीमद्वेंकटनायकः ॥ १॥
भवत्यभीष्टसर्वार्थप्रदस्तद्ब्रूहि नो मुने ।
इति पृष्टस्तदा सूतो ध्यात्वा स्वात्मनि तत् क्षणात् ॥
उवाच मुनिशार्दूल श्रूयतामिति वै मुनीन् ॥ २॥
॥ श्रीसूत उवाच॥
अस्ति किंचिन्महद्गोप्यं भगवत्प्रियकारकम् ।
पुरा शेषेण कथितं कपिलाय महात्मने ॥ ३॥
नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनम् ।
आदाय हेमपद्मानि स्वर्णदीसंभवानि च ॥ ४॥
ब्रह्मा वै पूर्वमभ्यर्च्य श्रीमद्वेंकटनायकम् ।
अष्टोत्तरशतैर्दिव्यैर्नामभिर्मुनिपुष्पकैः ॥ ५॥
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ।
भवद्भिरपि पद्मैश्च समभ्यर्च्य च नामतः ॥ ६॥
तेषां शेषनगाधीशो मनसो ह्लादकारकः ।
नाम्नामष्टशतं पुण्यं वेंकटाद्रिनिवासिनः ॥ ७॥
आयुरारोग्यदं पुंसां धनधान्यसुखप्रदम् ।
ज्ञानप्रदं विशेषेण महदैश्वर्यकारकम् ॥ ८॥
अर्चयेन्नामभिर्दिव्यैः वेंकटेशपदांतिकैः ।
नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ॥ ९॥
छंदोऽनुष्टुप् तथा देवो वेंकटेश उदाहृतः ।
नीलगोक्षीरसंभूतो बीजमित्युच्यते बुधैः ॥ १०॥
श्रीनिवासस्तथा शक्तिर्हृदयं वेंकटाधिपः ।
विनियोगस्तथाऽभीष्टसिद्ध्यर्थे विनिगद्यते ॥ ११॥
ॐ नमो वेंकटेशाय शेषाद्रिनिलयाय च ।
वृषदृग्गोचरायाथ विष्णवे सततं नमः ॥ १२॥
सदंजनगिरीशाय वृषाद्रिपतये नमः ।
मेरुपुत्रगिरीशाय सरस्स्वामितटं जुषे ॥ १३॥
कुमारकल्पसेव्याय वज्रदृग्विषयाय च ।
सुवर्चलासुतान्यस्त-सेनापत्यकराय च ॥ १४॥
रामाय पद्मनाभाय सदा वायुस्तुताय च ।

त्यक्तवैकुण्टलोकाय गुह्यकुंजविहारिणे ॥ १५ ॥
हरिचंदनगोप्तेंद्रस्वामिने सततं नमः ।
शंकरऽजननेत्राब्जविषयाय नमो नमः ॥ १६ ॥
वसूपरिचरित्राय कृष्णाय सततं नमः ।
अब्धिकन्यापरिष्वक्तवक्षसे वेंकटाय च ॥ १७ ॥
सनकादिमहायोगिपूजिताय नमो नमः ।
देवजित्प्रमुखानंतदैत्यसंघप्रणासिने ॥ १८ ॥
श्वेतद्वीपे वसन्मुक्तपूजितांघ्रियुगाय च ।
शेषपर्वतरूपत्वप्रशासनवराय च ॥ १९ ॥
सानुस्थापितताक्ष्र्याय ताक्ष्र्याचलनिवासिने ।
मायागूढविमानाय गरुडस्कन्धवासिने ॥ २० ॥
अनंतशिरसे नित्यमनंताक्षाय ते नमः ।
अनंतचरणाय श्रीशैलनिलयाय च ॥ २१ ॥
दामोदरय ते नित्यं नीलमेघनिभाय च ।
ब्रह्मादिदेवदृष्टाय विश्वरूपाय ते नमः ॥ २२ ॥
वेंकटागतसद्धेमविमानांतर्गताय च ।
अगस्त्यार्चिताशेषजनदृग्विषयाय च ॥ २३ ॥
वासुदेवाय हरये तीर्थपंचकवासिने ।
वामदेवप्रियायाथ जनकेष्टप्रदाय च ॥ २४ ॥
वाक्पतिब्रह्मधात्रे च चंद्रलावण्यदायिने ।
मार्कण्डेयमहातीर्थजातपुण्यप्रदाय च ॥ २५ ॥
नारायणनगेशाय ब्रह्मक्लृप्तोत्सवाय च ।
शंकचक्रगदापद्मलसत्करतलाय च ॥ २६ ॥
द्रवन्मृगमदासिक्तविग्रहाय नमो नमः ।
केशवाय नमस्तुभ्यं नित्ययौवनमूर्तये ॥ २७ ॥
अर्थितार्थप्रदात्रे च विश्वतोर्थौघहारिणे ।
तीर्थस्वामिसरःस्नातजनाभीष्टप्रदाय च ॥ २८ ॥
कुमारधारिकास्कन्दमह्यशक्ति-प्रदाय च ।
जमदग्निसमद्भूतपौत्रिणे कूर्ममूर्तये ॥ २९ ॥
किन्नरद्वंद्वशापांतप्रदात्रे माधवाय च ।
वैखानसमुनिश्रेष्ठ-पूजिताय नमो नमः ॥ ३० ॥
सिंहाचलनिवासाय श्रीमन्नारायणाय च ।
सद्भक्तनीलकण्ठाय नृसिंहाय नमो नमः ॥ ३१ ॥
कुमुदाक्षगणश्रेष्ठसेनापत्यप्रदाय च ।
दुर्मेधःप्राणहर्त्रे च वामनाय नमो नमः ॥ ३२ ॥
क्षत्रियान्तकरामाय मत्स्यरूपाय ते नमः ।

पाण्डवाघप्रहर्त्रे च श्रीधराय नमो नमः ॥ ३३॥
उपत्यकाप्रदेशस्थशंकरध्यानमूर्तये ।
रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने ॥ ३४॥
लसल्लक्ष्मीकरांभोजदत्तकल्हारकस्रजे ।
शालिग्रामनिवासाय शुकदृग्विषयाय च ॥ ३५॥
नारायणार्थिताशेषजनदृग्विषयाय च ।
मृगयारसिकायाथ वृषभासुरहारिणे ॥ ३६॥
अंजनागोत्रपतये वृषभाचलवासिने ।
अंजनासुतदात्रे च माधवस्याघहारिणे ॥ ३७॥
प्रियाङ्गप्रियकोलाय श्वेतकोलवराय च ।
नीलधेनुपयोधारासेकदेहोद्भवाय च ॥ ३८ ।
सगरप्रियमित्राय चोलपुत्रप्रियाय च ।
सुधर्मिणे सुचैतन्यप्रदात्रे मधुघातिने ॥ ३९॥
कृष्णाख्यविप्रवेदान्तदेशिकत्व प्रियाय च ।
वराहाचलनाथाय बलभद्राय ते नमः ॥ ४०॥
त्रिविक्रमाय महते हृषीकेशाय ते नमः ।
अच्युताय नमो नित्यं नीलाद्रिनिलयाय च ॥ ४१॥
नमः क्षीराब्धिनाथाय वैकुंठाचलवासिने ।
मुकुंदाय नमो नित्यं अनंताय नमो नमः ॥ ४२॥
विरिंचभ्यर्तितानीतसौम्यरूपाय ते नमः ।
सुवर्णमुखरीस्नातमनुजाभीष्टदायिने ॥ ४३॥
हलायुधजगत्तीर्थसमस्तफलदायिने ।
गोविन्दाय नमो नित्यं श्रीनिवासाय ते नमः ॥ ४४॥
अष्टोत्तरशतं नाम्नां चतुर्थ्या नमसान्वितम् ।
यः पठेच्छृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः ॥ ४५॥
वेंकटेशाभिधे यंत्रे वेंकटाद्रिनिवासिनः ।
अर्चयन्नामभिस्तस्य फलमुक्तं प्रसिध्यते ॥ ४६॥
अर्चनायां विशेषेण ग्राह्यमष्टोत्तरं शतम् ।
तस्य श्रीवेंकटेशश्च प्रसन्नो भवति ध्रुवम् ॥ ४७॥
गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत् ।
श्रद्धाभक्तियुजामेव दापयेन्नामसंग्रहम् ॥ ४८॥
इति शेषेण कथितं कपिलाय महात्मने ।
कपिलाख्यमहायोगिसकाशात्तु मयाश्रुतम् ।
तदुक्तं भवतामद्य सद्यः प्रीतिकरं हरेः ॥ ४९॥
॥ इति श्रीवराहपुराणे श्रीवेंकटेशाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

Encoded and proofread by

N. Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated May 2, 2008